| शान्तिगीता (Śāntigītā): **The Beginning** | |
|---|---|
| मङ्गलाचरणम् | Invocation |
| शान्तायाव्यक्तरूपाय मायाधाराय विष्णवे ।<br>स्वप्रकाशाय सत्याय नमोऽस्तु विश्वसाक्षिणे ॥ १॥ | *śāntāyāvyaktarūpāya māyādhārāya viṣṇave,*<br>*svaprakāśāya satyāya namo'stu viśvasākṣiṇe.* **1** |
| वाणी यस्य प्रकटति परं ब्रह्मतत्त्वं सुगूढं<br>मुक्तीच्छूनां गमयति पदं पूर्णमानन्दरूपम् ।<br>विभ्रान्तानां शमयति मतिं व्याकुलां भ्रान्तिमूलां<br>ब्रह्मा ह्येकां विदिशति परं श्रीगुरुं तं नमामि ॥ २॥ | *vāṇī yasya prakaṭati paraṃ brahma-tattvaṃ sugūḍham,*<br>*muktīcchūnām gamayati padam ,pūrṇam-ānanda-rūpam,*<br>*vibhrāntānām śamayati matim vyākulām bhrānti-mūlām*<br>*brahmā hi ekāṃ vidiśati param śrīgurum tam namāmi.* **2** |
| **उपक्रमः** | **Introduction** |
| विख्यातः पाण्डवे वंशे नृपेशो जनमेजयः ।<br>तस्य पुत्रो महाराजः शतानीको महामतिः ॥ १॥ | *vikhyātaḥ pāṇḍave vaṃśe nṛpeśaḥ janamejayaḥ,*<br>*tasya putraḥ mahārājaḥ śatānīkaḥ mahāmatiḥ. 1* |
| एकदा सचिवैर्मित्रैर्वेष्टितो राजमन्दिरे ।<br>उपविष्टः स्तूयमाने मागधैः सूतवन्दिभिः ॥ २॥ | *ekadā sacivair mitrair veṣṭitaḥ rāja-mandire .*<br>*upaviṣṭaḥ stūyamāne māgadhaiḥ sūta-vandibhiḥ. 2* |
| सिंहासनसमारूढो महेन्द्रसदृशप्रभः ।<br>नानावाक्यरसालापैः पण्डितैः सह मोदितः ॥ ३॥ | *siṃhāsana-samārūḍho mahendra-sadṛśa-prabhaḥ,*<br>*nānā-vākya-rasālāpaiḥ paṇḍitaiḥ saha moditaḥ. 3* |
| एतस्मिन् समये श्रीमान् शान्तव्रतो महातपाः ।<br>समागतः प्रसन्नात्मा तेजोराशिस्तपोनिधिः ॥ ४॥ | *etasmin samaye śrīmān śāntavrato mahātapāḥ,*<br>*samāgataḥ prasannātmā tejorāśis-taponidhiḥ. 4* |
| राजा दर्शनमात्रेण सामात्यमित्रबान्धवैः ।<br>प्रोत्थितो भक्तिभावेन हर्षेणोत्फुल्लमानसः ॥ ५॥ | *rājā darśana-mātreṇa sāmātya-mitra-bāndhavaiḥ,*<br>*protthitaḥ bhakti-bhāvena harṣeṇa utphulla-mānasaḥ. 5* |
| प्रणम्य विनयापन्नः प्रह्वीभावेन श्रद्धया ।<br>ददौ सिंहासनं तस्मै चोपवेशनकाङ्क्षया ॥ ६॥ | *praṇamya vinayāpannaḥ prahvī-bhāvena śraddhayā,*<br>*dadau siṃhāsanaṃ tasmai ca upaveśana-kāṅkṣayā. 6* |
| पाद्यमर्घ्यं यथायोग्यं भक्तियुक्तेन चेतसा । | *pādyam-arghyaṃ yathā-yogyam bhakti-yuktena cetasā,*<br>*divyāsane samāsīnam munim śāntavratam nṛpaḥ. 7* |

| | |
|---|---|
| दिव्यासने समासीनं मुनिं शान्तव्रतं नृपः ॥ ७॥<br>पप्रच्छ विनतः स्वास्थ्यं कुशलं तपसस्ततः ।<br>मुनिः प्रोवाच सर्वत्र सुखं सर्वसुखान्वयात् ॥ ८॥<br>अस्माकं कुशलं राजन् राज्ञः कुशलतः सदा ।<br>स्वाच्छन्द्यं राजदेहस्य राज्यस्य कुशलं वद ॥ ९॥<br>राजोवाच यत्र ब्रह्मन्नीदृशस्तापसोऽनिशम् ।<br>तिष्ठन् विराजते तत्र कुशलं कुशलेप्सया ॥ १०॥<br>क्षेममूर्त्तेः प्रसादेन भवतः शुभदृष्टितः ।<br>देहे गेहे शुभं राज्ये शान्तिर्मे वर्तते सदा ॥ ११॥<br>प्रणिपत्य ततो राजा विनयावनतः पुनः ।<br>कृताञ्जलिपुटः प्रह्वः प्राह तं मुनिसत्तमम् ॥ १२॥<br>श्रुता भवत्प्रसादेन तत्त्ववार्ता सुधा पुरा ।<br>इदानीं श्रोतुमिच्छामि यच्च सारतरं प्रभो ।<br>श्रुत्वा तत् कृतकृत्यः स्यां कृपया वद मे मुने॥ १३॥<br><br>शान्तव्रत उवाच ।<br>शृणु राजन् प्रवक्ष्यामि सारं गुह्यतमं परम् ।<br>यदुक्तं वासुदेवेन पार्थाय शोकशान्तये ॥ १४॥<br>शान्तिगीतेति विख्याता सदा शान्तिप्रदायिनी ।<br>पुरा श्रीगुरुणा दत्ता कृपया परया मुदा ॥ १५॥<br>तां ते वक्ष्यामि राजेन्द्र रक्षिता यत्नतो मया ।<br>भवद्बुभुत्सया राजन् शृणुष्वावहितः स्थिरः ॥ १६॥ | *papraccha vinataḥ svāsthyaṃ kuśalaṃ tapasas tataḥ,*<br>*muniḥ provāca sarvatra sukhaṃ sarva-sukhānvayāt. 8*<br>*asmākaṃ kuśalaṃ rājan rājñaḥ kuśalataḥ sadā,*<br>*svācchandyam rāja-dehasya rājyasya kuśalaṃ vada. 9*<br>*rājovāca yatra brahman īdṛśas tāpaso 'niśam,*<br>*tiṣṭhan virājate tatra kuśalam kuśalepsayā. 10*<br>*kṣema-mūrtteḥ prasādena bhavataḥ śubha-dṛṣṭitaḥ,*<br>*dehe gehe śubhaṃ rājye śāntir me vartate sadā. 11*<br>*praṇipatya tato rājā vinaya-avanataḥ punaḥ,*<br>*kṛātñjali-puṭaḥ prahvaḥ prāha taṃ muni-sattamam. 12*<br>*śrutā bhavat-prasādena tattva-vārtā-sudhā purā,*<br>*idānīṃ śrotum icchāmi yat ca sārataraṃ prabho.*<br>*śrutvā tat kṛta-kṛtyaḥ syāṃ kṛpayā vada me mune. 13*<br><br>*śāntavrataḥ uvāca*<br>*śṛṇu rājan pravakṣyāmi sāraṃ guhyatamaṃ param,*<br>*yaduktaṃ vāsudevena pārthāya śoka-śāntaye. 14*<br><br>*śānti-gītā iti vikhyātā sadā śānti-pradāyinī,*<br>*purā śrīguruṇā dattā kṛpayā parayā mudā. 15*<br><br>*tāṃ te vakṣyāmi rājendra rakṣitā yatnataḥ mayā,*<br>*bhavat-bubhutsayā rājan śṛṇuṣva avahitaḥ sthiraḥ. 16* |